# भ्वादिगणः - आत्मनेपदक्रियाः

**लभ् (लाभे) लट् (वर्त्तमाने)।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | लभते | लभेते | लभन्ते |
| म.पु. | लभसे | लभेथे | लभध्वे |
| उ.पु. | लभे | लभावहे | लभामहे |

**प्रथमपुरुषः।**

सः पुस्तकं लभते। छात्रौ मोदकं लभेते। बालकाः वस्त्राणि लभन्ते ।

**मध्यमपुरुषः।**

त्वं पुरस्कारं लभसे । युवां पद्मश्रीपुरस्कारं लभेथे। यूयम् अन्नं लभध्वे ।

**उत्तमपुरुषः।**

अहं ताडनं लभे । आवाम् आम्रफलं लभावहे । वयं नुतनवस्त्राणि लभामहे ।

**सह् धातुः लिट् परोक्षे।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | सेहे | सेहाते | सेहिरे |
| म.पु. | सेहिषे | सेहाथे | सेहिध्वे |
| उ.पु. | सेहे | सेहिवहे | सेहिमहे |

**प्रथमपुरुषः।**

रामः वने दुःखं सेहे । कृष्णबलरामौ शैशवे कष्टं सेहाते ।

नायकाः स्वातन्त्र्यसमरे त्यागं सेहिरे ।

**मध्यमपुरुषः।**

त्वं कष्टशतं सेहिषे। युवां दुःखं सेहाथे । यूयं बुभुक्षां सेहिध्वे ।

**उत्तमपुरुषः।**

अहं बाल्ये कष्टं सेहे । आवां शैशवे पिपासां सेहिवहे । वयं पूर्वजन्मनि दारिद्र्यं सेहिमहे ।

**सेव् धातुः लुट् अनद्यतन भाविकाले**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|

| | | | |
|---|---|---|---|
| प्र.पु. | सेविता | सेवितारौ | सेवितारः |
| म.पु. | सेवितासे | सेवितासाथे | सेविताध्वे |
| उ.पु. | सेविताहे | सेवितास्वहे | सेवितास्महे |

**प्रथमपुरुषः ।**

पुत्रः पितरं सेविता। शिष्यौ गुरूं सेवितारौ। सैनिकाः देशं सेवितारः।

**मध्यमपुरुषः ।**

त्वं पितामहं सेवितासे । युवां भर्तारं सेवितासाथे। यूयं विज्ञानसंस्थां सेविताध्वे ।

**उत्तमपुरुषः ।**

अहम् अध्यापकं सेविताहे । आवां देवं सेवितास्वहे । वयं समाजं सेवितास्महे ।

**कमु कान्तौ - लृट् सामान्यभावि ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | कामयिष्यते | कामयिष्येते | कामयिष्यन्ते |
| म.पु. | कामयिष्येते | कामयिष्येथे | कामयिष्यध्वे |
| उ.पु. | कामयिष्ये | कामयिष्यावहे | कामयिष्यामहे |

**प्रथमपुरुषः ।**

धनमोही धनं कामयिष्यते। चोरौ रत्नं कामयिष्येते। बालकाः मधुरं कामयिष्यन्ते।

**मध्यमपुरुषः ।**

त्वं मोक्षं कामयिष्यसे। युवां संस्कृतपठनं कामयिष्येथे। यूयं नेत्रदानं कामयिष्यध्वे।

**उत्तमपुरुषः ।**

अहं काञ्चनं न कामयिष्ये। आवाम् अतिलोभं न कामयिष्यावहे। वयं सर्वेषां सुखं कामयिष्यामहे।

**दद् दाने लोट् (आज्ञा प्रार्थना)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | ददताम् | ददेताम् | ददन्ताम् |
| म.पु. | ददस्व | ददेथाम् | ददध्वम् |
| उ.पु. | ददै | ददावहै | ददामहै |

**प्रथमपुरुषः ।**

धनिकः याचकाय धनं ददताम्। भवन्तौ गुरवे दक्षिणां ददेताम्। अध्यापकाः छात्रेभ्यः विज्ञानं ददन्ताम्।

**मध्यमपुरुषः।**

त्वं मात्रे वस्त्रं ददस्व। युवां भारताय सेवनं ददेथाम्। यूयं पित्रे संरक्षणं ददध्वम्।

**उत्तमपुरुषः।**

अहं संस्कृताय सेवनं ददै। आवां पठनाय पुस्तकं ददावहै । वयं मृगसंरक्षणाय प्रोत्साहनं ददामहै ।

## अय गतौ लङ् अनद्यतनभूते।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | आयत | आयेताम् | आयन्त |
| म.पु. | आयथाः | आयेथाम् | आयध्वम् |
| उ.पु. | आये | आयेवहि | आयेमहि |

**मध्यमपुरुषः।**

रामः वनम् आयत। ऋषी पर्णशालाम् आयेताम्। छात्राः पठनयात्रार्थं दिल्लिनगरम् आयन्त।

**मध्यमपुरुषः।**

त्वं केरलान् आयथाः। युवां मातुलगृहम् आयेथाम्। यूयम् आतुरालयम् आयध्वम्।

**उत्तमपुरुषः।**

अहं विदेशम् आये। आवां मन्दिरम् आयावहि। वयं पुस्तकालयम् आयामहि।

## दद – दाने विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | ददेत | ददेयाताम् | ददेरन् |
| म.पु. | ददेथाः | ददेयाथाम् | ददेध्वम् |
| उ.पु. | ददेय | ददेवहि | ददेमहि |

**प्रथमपुरुषः।**

रमा लेखनीं ददेत। छात्रौ पुस्तकं ददेयाताम्। महिलाः शिशुभ्यः स्तन्यं ददेरन्।

**मध्यमपुरुषः।**

त्वं पुत्रेभ्यः वस्त्रं ददेथाः। युवां संस्कृतपठनाय प्रोत्साहनं ददेयाथाम्। यूयम् निर्धनाय रूप्यकाणि ददेध्वम् ।

**उत्तमपुरुषः ।**

अहं कन्यादानार्थं सुवर्णं ददेय। आवां निर्धनबालकस्य पठनार्थं धनं ददेवहि। वयं देवप्रीत्यर्थं पुष्पाणि ददेमहि।

## लभ् धातुः - आशीर्लिङ् (आशिषि)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | लप्सीष्ट | लप्सीयास्ताम् | लप्सीरन् |
| म.पु. | लप्सीष्ठाः | लप्सीयीस्थाम् | लप्सीध्वम् |
| उ.पु. | लप्सीय | लप्सीवहि | लप्सीमहि |

**प्रथमपुरुषः ।**

भवान् जीवने शान्तिं लप्सीष्ट। हरिणौ यथेष्टसञ्चारार्थं स्वातन्त्र्यं लप्सीयास्ताम्।

जनाः सुखजीवनाय उत्तमवृत्तिं लप्सीरन्।

**मध्यमपुरुषः ।**

त्वं जीवने आत्मसंयमनं लप्सीष्ठाः। युवां सर्वदा देवप्रीतिं लप्सीयास्थाम्।

यूयं सर्वे आत्मशान्तिं लप्सीध्वम्।

**उत्तमपुरुषः ।**

अहं जीवने धीरतां लप्सीय। आवां पितृवात्सल्यं लप्सीवही। वयं बहुजनप्रीतिं लप्सीमहि।

## सेव – सेवा लुङ् सामान्यभूते

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | असेविष्ट | असेविषाताम् | असेविषत |
| म. पु. | असेविष्टाः | असेविषाथाम् | असेविध्वम् |
| उ. पु | असेविषि | असेविष्वहि | असेविष्महि |

**प्रथमपुरुषः ।**

सुरेषः ज्येष्ठभ्रातरम् असेविष्ट। पौत्रौ पितामहम् असेविषाताम्। शिष्याः गुरुम् असेविषत।

**मध्यमपुरुषः ।**

त्वं मातरम् असेविष्टाः। युवां मातामहीम् असेविषाथाम्। यूयं जन्मदेशम् असेविध्वम्।

**उत्तमपुरुषः ।**

अहं भर्तारम् असेविषि। आवां समाजम् असेविष्वहि। वयं रुग्णान् असेविष्महि।

**सह् - सहने लृङ् - हेतुहेतुमद्भावे**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | असहिष्यत | असहिष्येताम् | असहिष्यन्त |
| म. पु. | असहिष्याथाः | असहिष्येथाम् | असहिष्यध्वम् |
| उ. पु | असहिष्ये | असहिष्यावहि | असहिष्यध्वम् |

**प्रथमपुरुषः ।**

निषादः कष्टम् असहिष्यत चेत् मधु अलप्स्यत। रावणकुम्भकर्णौ दुराग्रहम् असहिष्येतां चेत् युद्धे मरणं न अभविष्यत्।

क्रीडकाः यत्नस्य काठिन्यम् असहिष्यन्त चेत् ओलिम्पिक् पतकं अलप्स्यताम्।

**मध्यमपुरुषः ।**

त्वम् अत्याग्रहम् असहिष्यथाः चेत् नाशः न अभविष्यत्। युवाम् औषधस्य तिक्तरसम् असहिष्येथां चेत् रोगात मोचनम् अलप्स्येथाम्।

यूयं पठनभारम् असहिष्यध्वम् चेत् उन्नतविजयम् अलप्स्यध्वम्।

**उत्तमपुरुषः ।**

अहं शैत्यम् असहिष्ये चेत् हिमालयारोहणम् अभविष्यत्। आवां साम्पत्तिक कष्टानि असहिष्यावहि चेत् दाम्पत्यं सुखमयम् अभविष्यत्।

वयं बुभुक्षाम् असहिष्यामहि चेत् धननष्टं न अभविष्यत्।

**पठ् धातुः  लट् परस्मैपदि वर्त्तमाने**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | पठति | पठतः | पठन्ति |
| म. पु. | पठसि | पठथः | पठथ |
| उ. पु | पठामि | पठावः | पठामः |

**प्रथमपुरुषः ।**

रामः संस्कृतं पठति। बालौ पुस्तकं पठतः। छात्राः कथां पठन्ति।

**मध्यमपुरुषः ।**

त्वं संस्कृतं पठसि। युवां पाठं पठथः। यूयं पुस्तकं पठथ।

**उत्तमपुरुषः ।**

अहं कवितां पठामि। आवां लेखनं पठावः। वयं कथां पठामः।

**भू धातुः लिट् - परोक्षे**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | बभूव | बभूवतुः | बभूवुः |
| म. पु. | बभूविथ | बभूवथुः | बभूव |
| उ. पु | बभूव | बभूविव | बभूविम |

**प्रथमपुरुषः ।**

मम पितामहः राष्ट्रपतिः बभूव। मम मातुलौ सैनिकौ बभूवतुः। पूर्विकाः वानररूपाः बभूवुः।

**मध्यमपुरुषः।**

त्वं शिशुः बभूविथ। युवां बालकौ बभूवथुः। यूयं छात्राः बभूव।

**उत्तमपुरुषः ।**

अहं स्वप्ने निर्धनः बभूव। आवां स्वप्ने यात्रिकौ बभूविव। वयं स्वप्ने संपन्नाः बभूविम।